ओ३म्

संस्कृत-

चतुर्थपुस्तकम्

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।
वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥१॥

तीनों लिङ्गों में, सर्व विभक्तियों में और सब वचनों में जो एक रूप रहता है वह अव्यय कहलाता है ॥ यथा-स्वर् = स्वर्गलोक, परलोक । अन्तर् = बीचमें । प्रातर् = प्रातःकाल। पुनर् = फिर, निश्चय । सनुतर् = छिपाना । उच्चैस् = ऊंचा। नीचैस् = नीचा । शनैस् = धीरे २ । ऋधक् = उचित, स्वीकार । ऋते = विना । युगपत् = एकसाथ । आरात् = दूर समीप । पृथक् = अलग । ह्यस् = जो दिन बीतगया । श्वस् = आने वाला दिन । दिवा = दिन में । रात्रौ = रातमें । शायम् = शामको । चिरम् = देरी में । मनाक्, ईषत् = अल्प,

कुछ। जोषम् = आनन्द, चुप। तूष्णीम् = चुप। वहिस्, अवस् = बाहर। समया, निकषा = समीप स्वयम् = खुद। वृथा = निष्फल। नक्तम् = रात्रि। नञ् = नहीं। हेतौ = निमित्त विषयमें। इद्धा, अद्धा = साक्षात् = सामि = आधा। ब्राह्मणवत् = ब्राह्मणके तुल्य। क्षत्रियवत् = क्षत्रियके सदृश। सना, सनत्, सनात् = सदा। तिरस् = टेढा, तिरछा। अन्तरा = बीचमें। अन्तरेण = विना। ज्योक् = विलम्ब। कम् = जल, सुख। शम् = सुख। सहसा = शीघ्र विना विचारे। नाना = अनेक। स्वस्ति = मङ्गल। स्वधा = पितृदान। अलम् = बस, शोभा। वषट्, श्रौषट्, वौषट् = देवदान में आते हैं। अन्यत् = और। अस्ति = है। उपांशु = चुपचाप। विहायसा = आकाशसे। दोषा = रात्रि। मृषा, मुधा = मिथ्या। पुरा = पूर्वकाल में। मिथो, मिथस् = परस्पर। प्रायस् = बहुधा। मुहुस् = वार २। प्रवाहिका, प्रवाहुकम् = समान-काल, ऊपर। आर्यहलम् = बलात्कार, जबरदस्ती। अभीक्ष्णम् = बारम्बार। साकम्, सार्द्धम् = साथ। नमस् = नमस्कृति। हिरुक् = वर्जन। धिक् = धिक्कार, छि। अथ = अनन्तर। अम् = शीघ्र, अल्प। आम् = स्वीकार। प्रताम् = ग्लानि। प्रशान् = शान्त। प्रतान = बढ़ना। मा,

माङ् = निषेध, प्रश्न ॥ अथचादि-च, ह = प्रसिद्ध । अह = आदर । एव = निश्चय, केवल । एवम् = इस प्रकार । नूनम् = ठीक । शश्वत् = सदा । युगपत् = एकसाथ । भूयस् = फिर। कूपत् = प्रश्न । कुवित् = अधिक । नत = सन्देह । चेत्, चण = यदि । कच्चित् = इष्ट प्रश्न । नह = नहीं । हन्त = हर्ष, शोक । माकिः, माकिम्, नाकिः, नाकिम् = रोकना । यावत् = जबतक । तावत् = तबतक । द्वै, त्वै = वितर्कमें, अनादरमें।स्वाहा = देवदान निमित्त आहुतिदेना।तथाहि = तैसेही । खलु = निषेध, सचमुच । किल = निश्चय, झूठ । अथ = पक्षान्तर, प्रश्न । सुष्ठु = अच्छा । स्म = भूतकालबोधक । आदह = धिक्कार ॥

भाषा बनाओ ।

स्वर्गे लोके महीयते । अन्तर्मदावस्थ इवाद्रिपेन्द्रः । प्रातर्भविष्यति गमिष्यति चौरभीतिः। उच्चैः पठन्ति शिशवोभवता निषध्याः। नाहं व्रजामि भगवन्! पठनाय नीचैः। शनैः कन्था शनैः पन्थाः शनैः पर्वतलङ्घनम् । ज्ञानादृते हि मनुजो लभते न मुक्तिम् । युगपत् सर्वे समागताः। कर्माणि पृथगाश्रयोः । ह्योमेमातुल आगतः। श्वस्ते श्रोतास्मि पाठनम्। रात्रौ गायन्ति गायकाः । क्षिप्रं विजानामि चिरं शृणोमि । बुधोन

तूष्णीं समितौ भवन्ति। बहिर्गता ब्राह्मणबालकाः सन्ति। चरान्ति नद्या निकषा कुरङ्गाः। स्वयं न खादन्ति फलानि वृक्षाः। प्रतिप्रियं चेद् भवतां न कुर्यां वृथा हि मे स्यात्स्वपदोपलब्धिः। नक्तन्दिवं ध्यायति सत्यसन्धम्। भवति साभिफलं सुमते! पते! सहसा विदधीत न क्रियामविवेकः परमापदां पदम्। स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। अलं महीपाल! तव श्रमेण। मृषा मुधा त्वया कन्ये! कदापि नो विधीयताम्। मिथो मन्त्रं न ते चक्रुः। निशीथे तस्कराः प्रायोविचरन्ति महीतले। मया सार्द्धं न गन्तव्यम्। नमस्ते भगवन्! भूयः। यावल्लिखामि भवता नहि तावदर्च्यम्॥

संस्कृत बनाओ।

स्वर्गलोक में महिमाको प्राप्त होता है। भीतर जिसके मद है ऐसे हाथी की नाईं था। सुबह होगा और चोर का डर जायगा। लड़के बलसे पढ़ते हैं आप मनैं करदें। महाशय! मैं पढ़ने के लिये नीचे नहीं जाता हूं। गुदड़ी का गूंथना, मार्गका चलना और पहाड़ से उतरना धीरे २ होता है। विना ज्ञानके मनुष्य मुक्तिको नहीं पासक्ता। एक साथ सब लड़के आगये। हम दोनों के काम भिन्न२ हैं। कल मेरे मामा आये हैं। कल तुम्हारा पढ़ाना सुनूंगा। गाने वाले

रात में गाते हैं। शीघ्र जानलेता हूं और बहुत देर तक सुनता हूं। सभा में विद्वान् चुप नहीं होते। ब्राह्मणों के सब लड़के बाहर चलेगये। नदी के समीप हरिण चरते हैं। वृक्ष अपने आप फल नहीं खाते। प्रत्युपकार यदि मैं आपका न करूं तो अपने पदकी उपलब्धि निरर्थक है। रात दिन परमेश्वर का ध्यान करता है। हे स्वामिन्! इसमें आधा फल होता है। बिना विचारे किसी कार्य को नहीं करना चाहिये क्योंकि मूर्खता तमाम दुःखों की जड़ है। हम कल्याणकारी मार्गपर सूर्य और चन्द्रकी तरह एक दूसरे के पीछे चलें। हे कवि! तुमको झूठ कभी न कहना चाहिये। उन्होंने आपस में सलाह नहीं की। अक्सर अर्धरात्रिमें चोर भूमिपर घूमा करते हैं। मेरे साथ नहीं चलना चाहिये। महाशय! आपको वार २ नमस्कार करता हूं। जबतक मैं लिखताहूं तबतक आपपूजा न करें। तुम दोनों अच्छा कार्य नहीं करते।

अथ तिङन्ते भ्वादिप्रकरणम् ॥

१—भू = होना, सत्ता ॥

१—लट्- भवति भवतः भवन्ति भवसि भवथः भवथ

१ लट् लट् लोट् लुङ् इनका अर्थ द्वितीय पुस्तक में लिखादिया है। लिट् लकारका प्रयोग भूतकालमें आता है लुट् का प्रयोग कालकी मर्यादा होने

भवामि भवावः भवामः । २-लिट्- बभूव बभूवतुः बभूवुः बभूविथ बभूवथुः बभूव बभूविव बभूविम । ३-लुट्- भविता भवितारौ भवितारः भवितासि भवितास्थः भवितास्थ भवितास्मि भवितास्वः भवितास्मः । ४-लृट्- भविष्यति भविष्यतः भविष्यन्ति भविष्यसि भविष्यथः भविष्यथ भविष्यामि भविष्यावः भविष्यामः । लोट्- भवतु, भवतात् भवताम् भवन्तु भव, भवतात् भवतम् भवत भवानि भवाव भवाम । ६लङ् अभवत् अभवताम् अभवन् अभवः अभवतम् अभवत अभवम् अभवाव अभवाम । ७ विधिलिङ्- भवेत् भवेताम् भवेयुः भवेः भवेतम् भवेत भवेयम् भवेव भवेम । आशीर्लिङ्- भूयात् भूयास्ताम् भूयासुः भूयाः भूयास्तम् भूयास्त भूयासम् भूयास्व भूयास्म । ९ लुङ् अभूत् अभूताम् अभूवन् अभूः अभूतम् अभूत अभूवम् अभूव अभूम । १०लृङ् अभविष्यत् अभविष्यताम् अभविष्यन् अभविष्यः अभविष्यतम् अभविष्यत अभविष्यम् अभविष्याव अभविष्याम ॥

पर भविष्यमें । लङ्-आजको छोड़कर भूतमें । विधिलिङ्-आज्ञामें आशीर्लिङ्-आशीर्वाद में लृङ् क्रियातिपत्तिमें १--इस गण में जितने धातु आवेंगे उनके रूप अधिकतर भू, के सदृश होंगे और जिन रूपोंमें भेद होगा उनको लिखा जावेगा ॥

२-अत = निरन्तर चलना ।

लट्-अतति० लिट्-आत आततुः आतुः आतिथ आतथुः आत आत आतिव आतिम । लुट्-अतिता० लृट्-अतिष्यति० लोट्-अततु० लङ्-आत् आतताम् आतन् आतः आततम् आत आतम् आताव आताम । विधिलिङ्-अतेत्० आ० लिङ्—अत्यात् अत्यास्ताम् अत्यासुः अत्याः अत्यास्तम् अत्यास्त अत्यासम् अत्यास्व अत्यास्म लुङ्-आतीत् आतिष्टाम् आतिषुः आतीः आतिष्टम् आतिष्ट आतिषम् आतिष्व आतिष्म । लृङ्-आतिष्यत्० ॥

३-षिध = जाना, जानना, प्रापण ।

लट्-सेधति० लिट्-सिषेध सिषिधतुः सिषिधुः सिषेधिथ सिषिधथुः सिषिध सिषेध सिषिधिव सिषिधिम।लुट्-सेधिता० लृट्-सेधिष्यति० लोट् सेधतु० लङ्-असेधत् असेधताम् असेधन् असेधः असेधतम् असेधत असेधम् असेधाव असेधाम । विधि लिङ्-सेधेत्० आशीर्लिङ् सिध्यात् सिध्यास्ताम् सिध्यासुः० । लुङ्-असेधीत् असेधिष्टाम् असेधिषुः । लृङ् असेधिष्यत्० ॥

४-चिती = जानना, स्मरण ।

लट्-चेतति० । लिट्-चिचेत चिचिततुः चिचितुः चिचे-

तिथ चिचितथुः चिचित चिचेत चिचितिव चिचितिम । लुट्—चेतिता० । चेतिष्यति । चेततु । अचेतत् । चेतेत् । चित्यात् चित्यास्ताम् चित्यासुः । अचेतीत् अचेतिष्टाम् अचेतिषुः । अचेतिष्यत् ॥

५—शुच = शोक, शोच करना ।

शोचति । शुशोच शुशुचतुः शुशोचिथ शुशुचथुः शुशुच शुशोच शुशुचिव शुशुचिम । शोचिता । शोचिष्यति । शोचतु । अशोचत् । शोचेत् शोचेताम् शोचेयुः । शुच्यात् शुच्यास्ताम् शुच्यासुः । अशोचीत् अशोचिष्टाम् अशोचिषुः । अशोचिष्यत् ॥

नागरिकम् = शहरका, के, की । ग्राम्यम् = गांवका । वनजम् = वनमें पैदा हुआ । गिरिजम् = पर्वत में जन्मा । सामुद्रम् = समुद्रका । पार्थिवम् = पृथिवीका । आप्यम् = जलका । तैजसम् = तेजका । वायव्यम् = वायुका । आम्बरम् = आकाशका । मार्त्तिकम् = मिट्टीका । औपलम् = पत्थरका । सौवर्णम् = सोनेका । राजतम् = चांदीका । पैत्तलम् = पीतलका । हृद्यम् = मनोहर । व्यवसायः = उद्यम, रोजगार । आचरणम् = चालचलन ।

भाषा बनाओ ।

नागरिकानि वस्तूनि हृद्यानि भवन्ति। ग्राम्या प्रजा मे कथनं करोति । बालिकेयं वदति श्वोमे गृहे होमो भविता । ह्योऽत्र किं किमभूत्। यदाहमागच्छेयं तदा यूयं तत्रैव भवेत । भवन्तो विद्यावन्तो धनवन्तो भूयासुः। यदि यूयं पठने श्रममकरिष्यत तर्हि शीघ्रमेव विद्वांसोऽभविष्यत। गिरिजानि फलानि मिष्टानि भवन्ति । अत्रत्यानि मार्त्तिकानि पात्राणि सुष्ठु भवन्ति । किं तत्रत्यानि समानि मन्दिराण्यौपलानि सन्ति ॥

संस्कृत बनाओ ।

शहरकी चीजें सुन्दर होती हैं । इस गांवकी प्रजा सब मेरा कहना मानती है । यह लड़की कहती है कि कल मेरे घर पर हवन होगा। कल यहां पर क्या २ हुवा । जब मैं आऊं तब तुम वहां होना। ईश्वर करे आप विद्वान् और धनवान् होवें । यदि तुम पढ़ने में मेहनत करोगे तो जल्द पण्डित होजावोगे । पहाड़के फल मीठे होते हैं । क्या यहांके मिट्टी के बर्तन अच्छे होते हैं । क्या वहांके सब मकानात पत्थरके हैं । इन लड़कोंका चाल चलन कैसा है ॥

६—गद = स्पष्ट बोलना ।

गदति । जगाद जगदतुः । जगदुः जगदिथ जगदथु जगद

जगाद, जगद जगदिव जगदिम । गदिता । गदिष्यति । गदतु अगदत् । गदेत् । गद्यात् । अगादीत्, अगदीत् । अगदिष्यत् ॥

७-णद = घण्टादिका शब्द, जो समझमें न आसके

नदति । ननाद नेदतुः नेदुः नदिता । नदिष्यति । नदतु । अनदत । नदेत् । नद्यात् । अनादीत्, अनदीत् अनादिष्टाम्, अनदिष्टाम् अनादिषुः अनदिषुः । अनदिष्यत् ॥

८—टु-नदि=फलना, फूलना, आनन्दहोना ॥

नन्दति । ननन्द ननन्दतुः ननन्दुः ननन्दिथ । नन्दिता । नन्दिष्यति । नन्दतु नन्देत् । नन्द्यात् नन्द्यास्ताम् नन्द्यासुः । अनन्दीत् अनन्दिष्टाम् अनन्दिषुः । अनन्दिष्यत् ॥

९--अर्च = सत्कार करना ।

अर्चति । आनर्च आनर्चतुः आनर्चुः आनर्चिथ आनर्चथुः आनर्च आनर्च आनर्चिव आनर्चिम । अर्चिता । अर्चिष्यति । अर्चतु । आर्चत् आर्चताम् आर्चन । अर्चेत् अर्चेताम् अर्चेयुः । अर्च्यात् अर्च्यास्ताम् अर्च्यासुः । आर्चीत् आर्चिष्टाम् आर्चिषुः । आर्चिष्यत् ।

१०--व्रज-जाना ॥

व्रजति । वव्राज वव्रजतुः वव्रजुः वव्रजिथ वव्रजथुः वव्रज

वव्राज वव्रज बव्राजिव वव्राजिम। व्रजिता व्रजिष्यति। व्रजतु अव्रजत् व्रजेत्। व्रज्यात्। अव्राजीत् अव्राजिष्टाम् अव्राजिषुः अव्राजिष्यत्

आक्षेपः = तानादेना। विक्षेपः = फेंकना। निशाकरः = चन्द्रमा। दिवाकरः = सूर्य। दूषणम् = ऐब, एतराज। विस्मयापन्नः = हैरान। संशयापन्नः = शकमें पड़ाहुआ। भव्यम् = शुभ, सत्य। परमार्थविन्दः = परोपकारी॥

भाषा बनाओ॥

जगाद भूयोजगदेकनाथः। कतिघण्टा नदन्तीदानीम्। आर्चीद् द्विजातीन् परमार्थविन्दान्। किमहं गदानि भवतां विदुषां पुरस्तात्। भवन्ति भव्येषु हि पक्षपाताः। अद्य दिवाकरस्य सन्तापस्तीक्ष्णोऽस्ति। निशाकरस्य किरणा मोदयन्ति॥

संस्कृत बनाओ॥

आचार पहिला धर्म है। क्या आपमें कोई दूषण नहीं है। मैं हैरान हूं कि आप ऐसे नरोंका सत्कार करते हैं। मैं बहुत समयसे शकमें पड़ा हुआ हूं। सचाई में पक्षपात होताहै। अनाचार से संसारमें पाप बढ़ते हैं॥

११--कट = वर्षना, ढाकना।

कटति। चकाट। कटिता। कटिष्यति। कटतु। अकटत्। कटेत्। कट्यात्। अकटीत्। अकटिष्यत्॥

१२—गुपू = रक्षण, बचाव।

गोपायति। लिट् गोपायाञ्चकार गोपायाञ्चक्रतुः गोपायाञ्चक्रुः गोपायाञ्चकर्थ गोपायाञ्चक्रथुः गोपायाञ्चक्र गोपायाञ्चकार, चकर गोपायाञ्चकृव गोपायाञ्चकृम। गोपायाम्बभूव गोपायाम्बभूवतुः गोपायाम्बभूवुः गोपायाम्बभूविथ गोपायाम्बभूवथुः गोपायाम्बभूव गोपायाम्बभूव गोपायाम्बभूविव गोपायाम्बभूविम। गोपायामास गोपायामासतुः गोपायामासुः गोपायामासिथ गोपायामासथुः गोपायामास गोपायामास गोपायामासिव गोपायामासिम। जुगोप जुगुपतुः जुगुपुः जुगोपिथ, जुगोप्थ जुगुपथुः जुगुप जुगोप जुगुपिव जुगुप्व जुगुपिम, जुगुप्म। लुट्—गोपायिता, गोपिता, गोप्ता लृट्—गोपायिष्यति, गोपिष्यति, गोप्स्यति। लोट्—गोपायतु अगोपायत्। गोपायेत् गोपायेताम् गोपायेयुः गोपायात् गोपाय्यास्ताम् गोपाय्यासुः, गुप्यात् गुप्यास्ताम् गुप्यासुः अगोपायीत्, अगोपीत् अगौप्सीत् अगौप्ताम् अगौप्सुः अगौप्सीः अगौप्तम् अगौप्त अगौप्सम् अगौप्स्व अगौप्स्म। अगोपायिष्यत्, अगोपिष्यत्, अगोप्स्यत्॥

१३—क्षि = नाश होना।

क्षयति। चिक्षाय चिक्षियतुः चिक्षियुः चिक्षयिथ, चिक्षेथ

चिक्षियथुः चिक्षिय चिक्षाय, चिक्षय चिक्षियिव चिक्षियिम। क्षेता। क्षेष्यति। क्षयतु। अक्षयत्। क्षयेत्। क्षीयात् क्षीयास्ताम् क्षीयासुः अक्षैषीत् अक्षैष्टाम् अक्षैषुः। अक्षेष्यत्॥

१४—तप = तपना, जलना।

तपति। तताप तेपतुः तेपुः तेपिथ, ततप्थ तेपथुः तेप ततापततप तेपिव तेपिम। तप्ता। तप्स्यति। तपतु। अतपत्। तपेत्। तप्यात्। अताप्सीत् अताप्ताम् अताप्सुः अताप्सीः अताप्तम् अताप्त अताप्सम् अताप्स्व अताप्स्म। अतप्स्यत्॥

१५—क्रमु = टहलना, चलना।

क्राम्यति, क्रामति। चक्राम चक्रमतुः चक्रमुः चक्रमिथ चक्रमथुः चक्रम चक्राम, चक्रम चक्रमिव चक्रमिम। क्रमिता। क्रमिष्यति। क्राम्यतु, क्रामतु। अक्राम्यत्, अक्रामत्। क्राम्येत्, क्रामेत्। क्रम्यात् क्रम्यास्ताम् क्रम्यासुः अक्रमीत् अक्रमिष्टाम् अक्रमिषुः। अक्रमिष्यत्॥

१६—पा = पीना।

पिबति। पपौ पपतुः पपुः पपिथ, पपाथ पपथुः पप पपौ पपिव पपिम। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्। पेयात् पेयास्ताम् पेयासुः। अपात् अपाताम् अपुः। अपास्यत्॥

१७--ग्लै=ग्लानि करना, नफरत ॥

ग्लायति । जग्लौ जग्लतुः जग्लुः जग्लिथ जग्लथुः जग्ल जग्लौ जग्लिव जग्लिम । ग्लाता । ग्लास्यति । ग्लायतु अग्लायत् । ग्लायेत् । ग्लायात् ग्लायास्ताम् ग्लायासुः, ग्लेयात् ग्लेयास्ताम् ग्लेयासुः । अग्लासीत् अग्लासिष्टाम् अग्लासिषुः । अग्लास्यत् ॥

१८--ह्वृ = कुटिलता करना ।

ह्वरति । जह्वार जह्वरतुः जह्वरुः जह्वर्थ जह्वरथुः जह्वर जह्वार जह्वर जह्वरिव जह्वरिम । ह्वर्ता । ह्वरिष्यति । ह्वरतु । अह्वरत् ह्वरेत् । ह्वर्यात् । अह्वार्षीत् । अह्वरिष्यत् ॥

१९--श्रु=सुनना ॥

शृणोति । शुश्राव शुश्रुवतुः शुश्रुवुः शुश्रविथ शुश्रोथ शुश्रुवथुः शुश्रुव शुश्राव, शुश्रुव शुश्रुम । श्रोता । श्रोष्यति शृणोतु । अशृणोत् । अशृणुताम् अशृण्वन् अशृणोः अशृणुतम् अशृणुत अशृणवम् अशृणुव, अशृण्व अशृणुम अशृण्म । शृणुयात् श्रूयात् श्रूयास्ताम् श्रूयासुः । अश्रौषीत् अश्रौष्टाम् अश्रौषुः । अश्रोष्यत् ॥

२०--गम्लृ = जाना ।

गच्छति । जगाम जग्मतुः जग्मुः जगमिथ, जगन्थ, जग्मथुः जग्म जगाम, जगम जग्मिव जग्मिम।गन्ता। गमिष्यति गच्छतु । अगच्छत् । गच्छेत् । गम्यात् अगमत् । अगमिष्यत्॥

पञ्चतत्त्वम् = पृथिवी जल तेज वायु आकाश । पञ्चत्वम् = मरना । प्रत्यवसानम् = भोजन । प्रतिमानम् = परछाईं । अजीर्णम् = बदहजमी । अज्ञानम् = बेवकूफी ।अध्ययनम् = पढ़ना । अध्यापनम् = पढ़ाना । अनुधावनम् = पीछेदौड़ना। सम्भ्रमः = आदर,तकल्लुफ । लमकः = लम्पट, अय्याश ।

॥ भाषा बनाओ ॥

गोपायति क्षितिमिमां चतुरब्धसीमाम् । अजीर्णं तव क्षेष्यति। तपस्तपति दुष्करम्।अश्वाःक्राम्यति नोगजाः । मदिरां पिबन्ति मूढा न ग्लायन्ति। मम वचनं शृणोषि भो!। सम्भ्रमो नहि कर्तव्यः । चैत्रन गन्तास्मि कदापि तत्र । क्षयन्तु पापानि ममाखिलानि मे प्रभो ! गच्छन्ति पारं भवसागरस्य ॥

संस्कृत बनाओ ।

पांच तत्त्व कौन हैं क्या आप जानते हैं ? जलमें परछाईंको

देखकर सिंह उसमें गिर गया । जितने रोग हैं वे सब बदहज्मी से होते हैं । हमारा पढ़ना पढ़ाना कुछ भी नहीं होता । तकल्लुफ अच्छा नहीं होता ॥

अथात्मनेपदप्रकरणम् ॥

१--एध = बढना, वृद्धि ।

लट्--एधते एधेते एधन्ते एधसे एधेथे एधध्वे एधे एधावहे एधामहे । लिट्--एधाञ्चक्रे एधाञ्चक्राते एधाञ्चक्रिरे एधाञ्चकृषे एधाञ्चक्राथे एधाञ्चकृढ्वे एधाञ्चक्रे एधाञ्चकृवहे एधाञ्चकृमहे । एधाम्बभूव एधाम्बभूवतुः एधाम्बभूवुः एधाम्बभूविथ एधाम्बभूवथुः एधाम्बभूव एधाम्बभूविव एधाम्बभूविम । एधामास एधामासतुः एधामासुः एधामासिथ एधामासथुः एधामास एधामास एधामासिव एधामासिम । लुट्--एधिता एधितारौ एधितारः एधितासे एधितासाथे एधिताध्वे एधिताहे एधितास्वहे एधितास्महे लृट्--एधिष्यते एधिष्येते एधिष्यन्ते एधिष्यसे एधिष्येथे एधिष्यध्वे एधिष्ये एधिष्यावहे एधिष्यामहे । लोट्--एधताम् एधेताम् एधन्ताम् एधस्व एधेथाम् एधध्वम् एधै एधावहै

एधामहै । लङ्—ऐधत ऐधेताम् ऐधन्त ऐधथाः ऐधेथाम् ऐधध्वम् ऐधे ऐधावहि ऐधामहि । विधिलिङ्—एधेत एधेयाताम् एधेरन् एधेथाः एधेयाथाम् एधेध्वम् एधेय एधेवहि एधेमहि । आशीर्लिङ्—एधिषीष्ट एधिषीयास्ताम् एधिषीरन् एधिषीष्ठाः एधिषीयास्थाम् एधिषीध्वम् एधिषीय एधिषीवहि एधिषीमहि। लुङ्—ऐधिष्ट,ऐधिषाताम् ऐधिषत ऐधिष्ठाःऐधिषाथाम् ऐधिध्वम् ऐधिषि ऐधिष्वहि ऐधिष्महि । लृङ्—ऐधिष्यत ऐधिष्येताम् ऐधिष्यन्त ऐधिष्यथाः ऐधिष्येथाम् ऐधिष्यध्वम् ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि ॥

२—कमु = इच्छा करना ।

कामयते । कामयाञ्चक्रे, कामयाम्बभूव, कामयामास, चकमे चकमाते चकमिरे चकमिषे चकमाथे चकमिध्वे चकमे चकमिवहे चकमिमहे । कामयिता, कमिता । कामयिष्यते, कमिष्यते । कामयताम् । अकामयत। कामयेत । कामयिषीष्ट, कामिषीष्ट । लुङ्-अचीकमत अचीकमेताम् अचीकमन्त अचीकमथाः अचीकमेथाम् अचीकमध्वम् अचीकमे अचीकमावहि अचीकमामहि । अचकमत अचकमेताम् अचकमन्त । अकामयिष्यत, अकमिष्यत ॥

३—अय = जाना ।

अयते, प्लायते । अयाञ्चक्रे, अयाम्बभूव, अयामास ॥ अयिता । अयिष्यते । अयताम् । आयत । अयेत अयिषीष्ट अयिषीयास्ताम् अयिषीरन् । आयिष्ट आयिषाताम् आयिषत आयिष्यत । आयिष्येताम् आयिष्यन्त ॥

४--द्युत = प्रकाश, चमक ।

द्योतते । दिद्युते दिद्युताते दिद्युतिरे दिद्युतिषे दिद्युताथे दिद्युतिध्वे दिद्युते दिद्युतिवहे दिद्युतिमहे । द्योतिता । द्योतिष्यते । द्योतताम् अद्योतत द्योतेत । द्योतिषीष्ट । अद्योतिष्ट अद्योतिषाताम् अद्योतिषत । अद्युतत् । अद्योतिष्यत ॥

५--श्विता = वर्ण, रङ्गना ॥

श्वतते । शिश्विते शिश्वितातेशिश्वितिरे शिश्वितिषे शिश्विताथे शिश्वितिध्वे शिश्विते शिश्वितिवहे शिश्वितिमहे । श्वेतिता । श्वेतिष्यते । श्वेतताम् । अश्वेतत । श्वेतेत । श्वेतिषीष्ट । अश्वेतिष्ट अश्वेतिषाताम् अश्वेतिषत । अश्वितत् अश्वितताम् अश्वितन् अश्वितः अश्वितम् अश्वितत अश्वितम् अश्विताव अश्विताम अश्वेतिष्यत ॥

६-ञिमिदा = स्नेहन, मिलना, चिकना ॥

मेदते । मिमिदे । मेदिता । मेदिष्यते । मेदताम् । अमेदत । मेदेत । मेदिषीष्ट । अमेदिष्ट । अमेदिष्यत ॥

७-ञिष्विदा = चिकना, त्याग ॥

स्वेदते । सिष्विदे । स्वेदिता । स्वेदिष्यते । स्वेदताम् । अस्वेदत । श्वेदेत । स्वेदिषीष्ट । अश्वेदिष्ट, अश्विदत् अश्विदताम् अश्विदन् । अस्वेदिष्यत ॥

८-ञिक्ष्विदा = चिकना, मोचन ।

क्ष्वेदते । चिक्ष्विदे । क्ष्वेदिता । क्ष्वेदिष्यते । क्ष्वेदताम् । अक्ष्वेदत । क्ष्वेदेत । क्ष्वेदिषीष्ट अक्ष्वेदिष्ट अक्ष्विदत् । अक्ष्वेदिष्यत ॥

९-रुच = प्रकाश, अतिप्रीति, अच्छा लगना ।

रोचते । रुरुचे रुरुचाते रुरुचिरे रुरुचिषे रुरुचाथे रुरुचिध्वे रुरुचे रुरुचिवहे । रुरुचिमहे । रोचिता रोचिष्यते रोचताम् । अरोचत रोचेत । रोचिषीष्ट अरोचिष्ट, अरुचत् । अरोचिष्यत ॥

१०-घुट = घोटना ॥

घोटते । जुघुटे । घोटिता । घोटिष्यते । घोटताम् । अघोटत ।

घोटेत । घोटिषीष्ट । अघोटिष्ट, अघुटत् । अघोटिष्यत ॥

भाषा बनाओ ॥

अस्य वनस्य वृक्षाः स्वयमेवैधन्ते । भारतीयाः प्राचीनाः क्षत्रिया-किं कामायाञ्चक्रिरे । श्वोयुष्मास्वको युद्धायाऽयिता । प्राच्यां भानुर्द्योतते । भवतामयं शाटः कथं न मेदताम् । वयं ते च समे मर्त्याः श्वोवः समितिमायितास्महे । मोदका मे न रोचन्ते । किं घोटायहमौषधम् ॥

संस्कृत बनाओ ॥

इस बनके वृक्ष अपने आप बढ़ते हैं । प्राचीन भारतवर्षके क्षत्रियोंने क्या चाहा । कल तुममें से कौन युद्धके लिये जावेगा । पूर्वकी ओर सूर्य चमकता है । आपका कपड़ा क्यों चिकना होवै । हम और वे सब मनुष्य कल तुम्हारी सभा में आवेंगे । लड्डू मुझे अच्छे नहीं लगते । क्या हम दवा को घोटैं ॥

११-शुभ = शोभा, अच्छा लगना ॥

शोभते । शुशुभे । शोभिता । शोभिष्यते । शोभताम् । अशोभत । शोभेत । शोभिषीष्ट । अशोभिष्ट, अशुभत् । अशोभिष्यत ॥

१२-क्षुभ = व्याकुलता, कांपना, क्षोभ ॥

क्षोभते । चुक्षुभे । क्षोभिता । क्षोभिष्यते।क्षोभताम् ।अक्षोभत। क्षोभेत । क्षोभिषीष्ट । अक्षोभिष्ट, अक्षुभत् । अक्षोभिष्यत ॥

१३–णभ = हिंसा, दुःख देना ।

नभते । ननभे । नभिता । नभिष्यते । नभताम् । अनभत । नभेत नभिषीष्ट । अनभिष्ट, अनभत् । अनभिष्यत ।

१४–तुभ = हिंसा ।

तोभते तुतुभे तोभिता तोभिष्यते तोभताम् अतोभत तोभेत तोभिषीष्ट अतोभिष्ट, अतुभत् अतोभिष्यत ॥

१५–स्रंसु = रपटना, गिरना ।

स्रंसते सस्रंसे स्रंसिता स्रंसिष्यते स्रंसताम् अस्रंसत स्रंसेत स्रंसिषीष्ट अस्रंसिष्ट, अस्रसत् अस्रंसिष्यत ॥

१६--भ्रंसु = नाश, नीचे गिरना ।

भ्रंसते बभ्रंसे भ्रंसिता भ्रंसिष्यते भ्रंसताम् अभ्रंसत भ्रंसेत भ्रंसिषीष्ट अभ्रंसिष्ट अभ्रसत् अभ्रंसिष्यत ॥

१७–ध्वंसु = जाना, गिरना ।

ध्वंसते दध्वंसे ध्वंसिता ध्वंसिष्यते ध्वंसताम् अध्वंसत

ध्वंसेत ध्वंसिषीष्ट अध्वंसिष्ट, अध्वसत् अध्वंसिष्यत ॥

१८—स्रंभु = विश्वास, भरोसा ।

स्रंभते सस्रंभे स्रंभिता स्रंभिष्यते स्रंभताम् अस्रंभत स्रंभेत स्रंभिषीष्ट अस्रंभिष्ट, अस्रभत् अस्रंभिष्यत ॥

१९—वृतु = वर्तना, होना ।

वर्तते । ववृते । वर्तिता । वर्तिष्यते, वर्त्स्यति । वर्त्स्यतः । वर्त्स्यन्ति । वर्तताम् । अवर्तत । वर्तेत । वर्तिषीष्ट । अवर्तिष्ट, अवृतत् । अवर्तिष्यत, अवर्त्स्यत् ॥

२०—दद = देना ।

ददते । दददे । दददाते । ददादिरे । ददादिषे । दददाथे । ददादिध्वे । दददे । ददादिवहे । ददादिमहे । ददिता । ददिष्यते ददताम् । अददत । ददेत । ददिषीष्ट । अददिष्ट । अददिष्यत।

कक्षः = फूंस । मञ्जुलम् = मनोहर । पलाण्डुः = प्याज । लशुनम्=लहसुन । ताम्बूलाधानम्=पानदान । सरटः=धिरघट । प्रतीरम्=किनारा । प्रसाधनम्=सजावट । मज्जनम्=नहाना । नौवाहः=मल्लाह । शकटवाहः=गाड़ीवान । रथवाहः=रथवान । हलवाहः=हलवान । पलाटः=मुद्ग, मूंग । बालिशः = बेवकूफ । प्रणाली=पनाला । वल्लकी=बीन । वल्लरी=बाल ॥

भाषा बनाओ ।

मूर्खोऽपि शोभते तावद् यावत् किञ्चिन्न भाषते। चुक्षुभे द्विषतां मनः । गजं नभते केसरी । स्रसिष्यते पादोऽत्र । दर्पेण ध्रंसते ज्ञानी । मानी ध्वंसते सुखात् । स्रम्भेऽहं त्वयि सर्वदा । भक्षितेऽपि लशुने न शान्तो व्याधिः । नौवाहानहिवर्तन्ते हलवाहस्य सन्निधौ ॥

संस्कृत बनाओ ।

यह गाड़ीवान फूंसका क्या करेगा । मूर्ख तबतक अच्छा लगता है जबतक कुछ बोलता नहीं । रघुकी सेनाको देखकर वैरियोंका मन क्षोभित हुआ । यहां पैर रपटता है। अहंकारसे ज्ञानी नष्ट होता है । घमण्डी सुखसे नीचे गिरा करता है। मैं तुम्हारा सदा भरोसा रखता हूं । लहसन खानेपर भी रोग शान्त नहीं हुआ । हल चलाने वालेके समीप मल्लाह नहीं है ॥

२१—त्रपुष् = लज्जा, शरम ।

त्रपते । त्रेपे । त्रपिता, त्रप्ता । त्रपिष्यते, त्रप्स्यते । त्रपताम् अत्रपत । त्रपेत । त्रपिषीष्ट, त्रप्सीष्ट । अत्रपिष्ट अत्रपिषाताम्

अत्रपिषत । अत्रप्त अत्रप्साताम् । अत्रप्सत । अत्रपिष्यत, अत्रप्स्यत ॥

अथोभयपदप्रकरणम् ॥

१–श्रिञ् = सेवा, सहारालेना ।

श्रयते, श्रयति । शिश्रिये शिश्रियाते शिश्रियिरे शिश्रियिषे शिश्रियाथे शिश्रियिध्वे शिश्रिये शिश्रियिवहे शिश्रियिमहे । शिश्राय शिश्रियतुः शिश्रियुः शिश्रियिथ शिश्रियथुः शिश्रिय शिश्राय, शिश्रिय शिश्रियिव शिश्रियिम । श्रयितासे, श्रयितासि । श्रयिष्यते, श्रयिष्यति । श्रयताम्, श्रयतु । अश्रयत, अश्रयत् । श्रयेत, श्रयेत् । श्रयिषीष्ट, श्रीयात् । अशिश्रियत अशिश्रियताम् अशिश्रियन्त अशिश्रियथाः अशिश्रियेथाम् अशिश्रियध्वम् अशिश्रिये अशिश्रियावहि अशिश्रियामहि, अशिश्रियत् अशिश्रियताम् अशिश्रियन् । अश्रयिष्यत, अश्रयिष्यत् ॥

२–भृञ् = भरण, पोषण, पालन ।

भरते, भरति । बभ्रे बभ्राते बभ्रिरे बभृषे बभ्राथे बभृढ्वे बभ्रे बभृवहे बभृमहे, बभार बभ्रतुः बभ्रुः बभर्थ बभ्रथुः

बभ्र बभार, बभर बभृव बभृम । भर्त्तासे, भर्त्तासि । भरिष्यते, भरिष्यति । भरताम्, भरतु । अभरत, अभरत् । भरेत्, भरेत । भृषीष्ट, भ्रियात् । अभृत अभृषाताम् अभृषत अभृथाः अभृषाथाम् अभृढ्वम् अभृषि अभृष्वहि अभृष्महि, अभार्षीत् अभार्ष्टाम् अभार्षुः अभार्षीः अभार्ष्टम् अभार्ष्ट अभार्षम् अभार्ष्व अभार्ष्म । अभरिष्यत, अभरिष्यत् ॥

३—हृञ् = हरण, चुराना ।

हरते, हरति । जह्रे जह्राते जह्रिरे जहृषे जह्राथे जहृढ्वे जह्रे जहृवहे जहृमहे, जहार जह्रतुः जह्रुः जहर्थ जह्रथुः जह्र जहार, जहर जहृव जहृम । हर्तासे, हर्तासि । हरिष्यते, हरिष्यति । हरताम्, हरतु । अहरत, अहरत् । हरेत, हरेत् । हृषीष्ट, ह्रियात् । अहृत, अहार्षीत् । अहरिष्यत, अहरिष्यत् ॥

४—धृञ् = धारण, रखना ।

धरते, धरति । दध्रे दध्राते दध्रिरे, दधार दध्रतुः दध्रुः धर्तासे, धर्तासि । धरिष्यते, धरिष्यति । धरताम्, धरतु । अधरत, अधरत् । धरेत, धरेत् । धृषीष्ट, ध्रियात् । अधृत, अधार्षीत् । अधरिष्यत, अधरिष्यत् ॥

५--णीञ् = प्रापण, लेजाना ।

नयते, नयति । निन्ये निन्याते निन्यिरे, निनाय निन्यतुः निन्युः । नेतासे, नेतासि । नेष्यते, नेष्यति । नयताम्, नयतु । अनयत, अनयत् । नयेत, नयेत् । नयिसीष्ट, नीयात्, अनेष्ट, अनेषाताम्, अनेषत, अनैषीत्, अनैष्टाम् अनैषुः । अनेष्यत, अनेष्यत् ॥

६—डुपचष् = पकाना ।

पचते, पचति । पेचे पेचाते पेचिरे, पपाच पेचतुः पेचुः । पक्तासे, पक्तासि । पक्ष्यते, पक्ष्यति । पचताम् पचतु । अपचत, अपचत् । पचेत, पचेत् । पक्षीष्ट, पच्यात् । अपक्त अपक्षाताम् अपक्षत अपक्थाः अपक्षाथाम् अपग्ध्वम् अपाक्षि अपक्ष्वहि अपक्ष्महि, अपाक्षीत् अपाक्ताम् अपाक्षुः अपाक्षीः अपाक्तम् अपाक्त अपाक्षम् अपाक्ष्व अपाक्ष्म । अपक्ष्यत, अपक्ष्यत् ।

७—भज = सेवा, भजन ।

भजते, भजति । भेजे भेजाते भेजिरे, बभाज भेजतुः भेजुः । भक्तासे, भक्तासि । भक्ष्यते, भक्ष्यति । भजताम्, भजतु । अभजत, अभजत् । भजेत, भजेत् । भक्षीष्ट, भज्यात् । अभक्त

अभक्षाताम् अभक्षत अभक्थाः अभक्षाथाम् अभग्ध्वम् अभक्षि अभक्ष्वहि अभक्ष्महि, अभाक्षीत्, अभाक्ताम् अभाक्षुः । अभक्ष्यत, अभक्ष्यत् ॥

८--यज = देवपूजा, सङ्गतिकरण, दान ।

यजते, यजति । ईजे ईजाते ईजिरे ईजिषे ईजाथे ईजिध्वे ईजे ईजिवहे ईजिमहे । इयाज ईजतुः ईजुः इयजिथ, इयष्ठ ईजथुः ईज इयाज, इयज ईजिव ईजिम । यष्टासे, यष्टासि । यक्ष्यते, यक्ष्यति । यजताम्, यजतु । अयजत, अयजत् । यजेत, यजेत् । यक्षीष्ट, इज्यात् । अयष्ट अयक्षाताम् अयक्षत अयष्ठाः अयक्षाथाम् अयग्ध्वम् अयक्षि अयक्ष्वहि अयक्ष्महि, अयाक्षीत् अयाष्टाम् अयाक्षुः । अयक्ष्यत, अयक्ष्यत् ॥

९—वह = लेजाना, पहुंचाना, ढोना ।

वहते, वहति । ऊहे ऊहाते ऊहिरे ऊहिषे ऊहाथे ऊहिध्वे ऊहे ऊहिवहे ऊहिमहे, उवाह ऊहतुः ऊहुः उवहिथ, उवोढ ऊहथुः ऊह उवाह, उवह ऊहिव ऊहिम । वोढा वोढारौ वोढारः वोढासे वोढासाथे वोढाध्वे वोढाहे वोढास्वहे वोढास्महे, वोढासि वोढास्थः । वक्ष्यते, वक्ष्यति । वहताम्, वहतु । अवहत, अवहत् । वहेत, वहेत् । वक्षीष्ट, उह्यात्—

लुङ्—अवोढ अवक्षाताम् अवक्षत अवोढाः अवक्षाताम् अवो-ढ्वम् अवाक्षि अवक्ष्वहि अवक्ष्महि, अवाक्षीत् अवोढाम् अ-वाक्षुः अवाक्षीः अवोढम् अवोढ अवाक्षम् अवाक्ष्व अवाक्ष्म अवक्ष्यत, अवक्ष्यत् ॥

पारिषदः = सदस्य, मेम्बर । प्रश्रयः = प्रेम, मोहब्बत । बीजम् = कारण । सम्भारः = आरम्भ । ससम्भ्रमम् = सादर । प्रेङ्खणम् = युद्ध । उपकण्ठः = समीप । निवर्तनम् = लौटना । अन्तरालम् = मध्य, बीच । अङ्गनम् = आंगन विभ्रमः = विलास । शीतः = शीतल, ठण्डा । वैलक्षम् = सङ्कोच । पाण्डित्यम् = चतुराई । उपाख्यानम् = पुराना हाल बयान करना । नियोगः = आज्ञा । शमनम् = शान्ति ॥

भाषा बनाओ ।

ससम्भ्रमं स श्रयते न स्वामिनम् । काकोऽप्युदरं भरते । धरते योधुरं धर्म्यात्मा पाकान् पचन्ति पाचकाः । भारं वहन्ति गर्दभाः । अग्ने! नय सुपथाराये। मणोपकण्ठे न वहन्ति नद्यः॥

संस्कृत बनाओ ॥

वह आदर के साथ स्वामीकी सेवा नहीं करता । कव्वा भी अपना पेट भरलेता है। धर्मयुक्त जो धुराको धारण करता

है उसका राज्य चिरकाल तक रहता है। रसोइये पाक पकाते हैं। गदहे भार ढोते हैं। हे परमात्मन्! धर्मरूपी धनके लिये अच्छे मार्गसे लेचल। मेरे पास नदियां नहीं बहती हैं॥

इति भ्वादिगणप्रकरणम्॥

अथादादि गण प्रकरणम्॥

१–अद = खाना॥

लट्–अत्ति अत्तः अदन्ति अत्सि अत्थः अत्थ अद्मि अद्वः अद्मः लिट्–आद अदतुः आदुः आदिथ आदथुः आद आद आदिव आदिम। जघास जक्षतुः जक्षुः जघसिथ जक्षथुः जक्ष जघास, जघस जक्षिव जक्षिम। लुट्–अत्ता अत्तारौ अत्तारः अत्तासि अत्तास्थः अत्तास्थ अत्तास्मि अत्तास्वः अत्तास्मः। लृट्—अत्स्यति अत्स्यतः अत्स्यन्ति। लोट्–अत्तु, अत्तात् अत्ताम् अदन्तु अद्धि अत्तात् अत्तम् अत्त अदानि अदाव अदाम लङ्–आदत् आत्ताम् आदन् आदः आत्तम् आत्त आदम् आद्व आद्म। वि० लिङ्–अद्यात् अद्याताम् अद्युः अद्याः अद्यातम् अद्यात अद्याम् अद्याव अद्याम। अद्यात् अद्यास्ताम् अद्यासुः। अघसत् अघसताम् अघसन्। आत्स्यत् आत्स्यताम् आत्स्यन्॥

२—हन = हिंसा, दुःख, जाना, जानना, प्रापण ।

लट्—हन्ति हतः घ्नन्ति हंसि हथः हथ हन्मि हन्वः हन्मः लिट्—जघान जघ्नतुः जघ्नुः जघनिथ, जघन्थ जघ्नथुः जघन जघान, जघन जघ्निव जघ्निम । लुट् हन्ता हन्तारौ हन्तारः लृट्—हनिष्यति । लोट् हन्तु, हतात् हताम् घ्नन्तु जहि, हतात् हतम् हत हनानि हनाव हनाम । लङ्—अहन् अहताम् अघ्नन् अहन् अहतम् अहत अहनम् अहन्व अहन्म । वि॰लिङ्—हन्यात् हन्याताम् हन्युः हन्याः हन्यातम् हन्यात हन्याम् हन्याव हन्याम । आ॰लिङ् वन्ध्यात् वध्यास्ताम् वध्यासुः वध्याः वध्यास्तम् वध्यास्त वध्यासम् वध्यास्व वध्यास्म । लुङ्—अवधीत् अवधिष्टाम् अवधिषुः अवधीः अवधिष्टम् अवधिष्ट अवधिषम् अवधिष्व अवधिष्म । लृङ्—अहनिष्यत् अहनिष्यताम् अहनिष्यन् ॥

३—यु = मिलाना, न मिलाना ।

यौति युतः युवन्ति यौषि युथः युथ यौति युवः युमः युयाव युयुवतुः युयुवुः युयुविथ युयुवथुः युयुव युयाव, युयव युयुविव युयुविम । यविता यविष्यति । यौतु, युतात् युताम् युवन्तु युहि, युतात् युतम् युत यवानि यवाव यवाम ।

अयौत् अयुताम् अयुवन् अयौः अयुतम् अयुत अयवम् अयुव अयुम । युयात् युयाताम् युयुः युयाः युयातम् युयात युयाम् युयाव युयाम । यूयात् यूयास्ताम् यूयासुः । अयावीत् अयाविष्टाम् अयाविषुः अयावीः अयाविष्टम् अयाविष्ट अयाविषम् अयाविष्व अयाविष्म । अयविष्यत् ॥

४—या = प्रापण, पाना, पहुंचजाना ।

याति यातः यान्ति । ययौ ययतुः ययुः ययिथ, ययाथ ययथुः यय ययौ ययिव ययिम । याता । यास्यति । यातु, यायात् याताम् यान्तु याहि, यातात् यातम् यात यानि याव याम । अयात् अयाताम् अयुः, अयान् अयाः अयातम् अयात अयाम् अयाव अयाम । यायात् यायाताम् यायुः यायाः यायातम् यायात यायाम् यायाव यायाम । यायात् यायास्ताम् यायासुः । अयासीत् अयासिष्टाम् अयासिषुः अयासीः अयासिष्टम् अयासिष्ट अयासिषम् अयासिष्व अयासिष्म । अयास्यत् ॥

५—वा = गति, सूचना ।

वाति । ववौ ववतुः ववुः । वाता । वास्यति । वातु अवात् । वायात् वायाताम् वायुः । वायात् वायास्ताम् वायासुः । अवासीत् अवासिष्टाम् अवासिषुः अवास्यत् ॥

संस्कृत बनाओ ।

आधे लड़के खाते हैं और आधे पाठशाला को जाते हैं । आज चोरोंको मैं अवश्य मारूंगा । विद्वानोंमें मूर्खोंको क्यों मिलाते हो । कल मैं शामको इलाहाबाद पहुंचूगा । हवायें चलती हैं और चलेंगी । हमने इन लड़कों को कभी भी नहीं मारा ॥

भाषा बनाओ ।

नेमे अदन्ति बालानेमे मयान्ति । अद्यचौरान् हनिष्यामि । विद्वत्सु मूर्खान् न युयात यूयम् । मयागं श्वोऽहं यातास्मि । वायवोवान्ति वास्यन्ति । इमान् बालान् वयं कदापि नावधिष्म ॥

६—भा = प्रकाश, चमक, रोशनी ॥

भाति भातः भान्ति । बभौ बभतुः बभुः । भाता । भास्यति भातु । अभात् । भायात् भायाताम् भायुः । भायात् भायास्ताम् भायासुः । अभासीत् अभासिष्टाम् अभासिषुः । अभास्यत् ॥

७—ष्णा = पवित्रता, स्नान, नहाना ॥

स्नाति । सस्नौ सस्नतुः सस्नुः । स्नाता । स्नास्यति ।

स्नातु । अस्नात् स्नायात् स्नायाताम् स्नायुः । स्नायात् स्नायास्ताम् स्नायासुः, स्नेयात् स्नेयास्ताम् स्नेयासुः अस्नासीत् अस्नासिष्टाम् अस्नासिषुः । अस्नास्यत् ।

८—श्रा = पकाना ।

श्राति । शश्रौ शश्रतुः शश्रुः । श्राता । श्रास्यति । श्रातु अश्रात् । श्रायात् । श्रायात्, श्रेयात् । अश्रासीत् अश्रासिष्टाम् अश्रासिषुः । अश्रास्यत् ।

९—द्रा = बुराचलन, निन्दा ।

द्राति । दद्रौ । द्राता । द्रास्यति । द्रातु । अद्रात् द्रायात् । द्रायात्, द्रेयात् । अद्रासीत् । अद्रास्यत् ॥

१०—प्सा = खाना ।

प्साति । पप्सौ । प्साता । प्सास्यति । प्सातु । अप्सात् । प्सायात् । प्सायात्, प्सेयात् । अप्सासीत् । अप्सास्यत् ॥

११—रा = देना ।

राति । ररौ । राता । रास्यति । रातु । अरात् । रायात् । रायात् । अरासीत् । अरास्यत् ॥

१२--ला = लेना।

लाति। ललौ। लाता। लास्यति। लातु। अलात्-लायात्। लायात्। अलासीत्। अलास्यत्॥

१३--दाप् = काटना।

दाति। ददौ। दाता। दास्यति। दातु अदात्। दायात् दायात्। अदासीत्। अदास्यत्॥ एवं 'पा'

१४--ख्या=कहना, बोलना।

॥ ख्याति। ख्यातु। अख्यात् ख्यायात्॥ इसका सार्वधातुक में ही प्रयोग होता है॥

१५--विद् = जानना॥

वेत्ति वित्तः विदन्ति वेत्सि वित्थः वित्थ वेद्मि विद्वः विद्मः वेद विदतुः विदुः वेत्थ विदथुः विद वेद विद्व विद्म। लिट्-विदाञ्चकार विदाञ्चक्रतुः विदाञ्चक्रुः। विदाञ्चकर्थ विदाञ्चक्रथुः विदाञ्चक्र विदाञ्चकार, चकर विदाञ्चकृव विदाञ्चकृम। विवेद विविदतुः विविदुः। वेदिता। वेदिष्यति। वेत्तु विद्धि वेदानि, विदाङ्कुरु विदाङ्करवाणि। अवेत् अवित्ताम् अविदुः। विद्यात् विद्यास्ताम् विद्युः। विद्यात् विद्यास्ताम् वि

याम्नुः । अवेदीत् अवेदिष्ठाम् अवेदिषुः । अवेदिष्यत् ॥

प्रस्थानम् = जाना । गोपनम् = छिपाना । निधनम् ॥ मृत्यु, नाश । लाञ्छनम् = कलङ्क । आयतनम् = स्थान । गोलाङ्गूलः = लंगूर । निवहः = समूह । विहारः = क्रीडा । समवायः = समूह । वालेयः = गदहा । वैश्वानरः = अग्नि । आमुष्यायिकः = वैदिक । निर्वेदः = वैराग्य । गरलम् = विष । पीयूषम् = अमृत । सागरः = समुद्र ।

भाषा बनाओ ।

न तत्र सूर्योभाति न चन्द्रतारकम् । स्नास्यन्ति न मम जले । संयावं श्रान्ति पाचकाः । प्सामि पक्वानि फलानि सर्वदा । रास्यामि वेदं गुरवे कृपालवे । लास्यन्ति ते साम्प्रति राजधानीम् । न दान्तु वृक्षान मम सागरस्य । अख्युस्ते शोभनं वचः । वेत्ति सर्वाणि शास्त्राणि गर्वोयस्य न विद्यते । वैश्वानरोयसते सूर्येण ।

संस्कृत बनाओ ।

न वहां सूर्य चमकता है न चन्द्र न और तारे । वे मेरे पानीमें नहीं नहावेंगे । रसोइये हलवा पकाते हैं । मैं सदा पकेहुये फल खाता हूं । कृपालु गुरुजीके लिये वेदका पुस्तक

दूंगा। इस समय वे राजधानी लेंगे। मेरे समुद्रके तरु न काटो। उन्होंने अच्छा वचन कहा। सब शास्त्रोंको जानता है परंतु जिसको अहंकार नहीं है॥

१६--अस = होना, सत्ता।

अस्ति स्तः सन्ति। लोट्-अस्तु, स्तात् स्ताम् सन्तु एधि, स्तात् स्तम् स्त असानि असाव असाम। लङ्-आसीत् आ-स्ताम् आसन् आसीः आस्तम् आस्त आसम् आस्व आस्म वि० लिङ्-स्यात् स्याताम् स्युः स्याः स्यातम् स्यात स्याम् स्याव स्याम। शेष लकारोंके रूप 'भू' के सदृश होते हैं॥

१७--इण् = चलना, जाना।

एति इतः यन्ति एषि इथः इथ एमि इवः इमः। इयाय ईयतुः ईयुः इययिथ, इयेथ ईयथुः ईय इयाय, इयय ईयिव ईयिम। एता एतारौ एतारः। एष्यति। एतु, इतात् इताम् यन्तु एहि, इतात् इतम् इत अयानि अयाव अयाम। ऐत् ऐताम् आयन् ऐः ऐतम् ऐत आयम् ऐव ऐम। इयात् इया-ताम् इयुः इयाः इयातम् इयात इयाम् इयाव इयाम। ईयात् ईयास्ताम् ईयासुः ईयाः ईयास्तम् ईयास्त ईयासम् ईयास्व

ईयास्म । अगात् अगाताम् अगुः अगाः अगातम् अगात अगाम् अगाव अगाम । ऐष्यत् ऐष्यताम् ऐष्यन् ॥

अथात्मनेपदप्रकरणम् ।

१८--शीङ् = सोना, नींद ।

शेते । लिट् शिश्ये शिश्याते शिशियरे शिशियषे शिश्याथे शिशियध्वे शिश्ये शिशियवहे शिशियमहे । शयिता शयितारौ शयितारः शयितासे शयितासाथे शयिताध्वे शयिताहे शयितास्वहे शयितास्महे । शयिष्यते शयिष्येते शयिष्यन्ते । शेताम् शयाताम् शेरताम् । अशेत अशयाताम् अशेरत अशेथाः अशयाथाम् अशेध्वम् अशयि अशेवहि अशेमहि । शयीत शयीयाताम् शयीरन् शयीथाः शयीयाथाम् शयीध्वम् शयीय शयीवहि शयीमहि । शयिषीष्ट शयिषीयास्ताम् शयिषीरन् शयिषीष्ठाः शयिषीयास्थाम् शयिषीढ्वम् शयिषीय शयिषीवहि शयिषीमहि । अशयिष्ट अशयिषाताम् अशयिषत । अशयिष्यत ॥

१९--इङ् = अध्ययन, पढना ।

अधीते अधीयाते अधीयते अधीषे अधीयाथे अधीध्वे अधीये

अधीवहे अधीमहे। अधिजगे अधिजगाते अधिजगिरे अधिजगिषे अधिजगाथे अधिजगिध्वे अधिजगे अधिजगिवहे अधिजगिमहे। अध्येता अध्येतारौ अध्येतारः। अध्येष्यते अध्येष्येते अध्येष्यन्ते। अधीताम् अधीयाताम् अधीयताम् अधीष्व अधीयाथाम् अधीध्वम् अध्ययै अध्ययावहै अध्ययामहै लङ्—अध्यैत अध्यैयाताम् अध्यैयत अध्यैथाः अध्यैयाथाम् अध्यैध्वम् अध्यैयि अध्यैवहि अध्यैमहि। अधीयीत अधीयीयाताम् अधीयीरन् अधीयीथाः अधीयीयाथाम् अधीयीध्वम् अधीयीय अधीयीवहि अधीयीमहि। अध्येषीष्ट अध्येषीयास्ताम् अध्येषीरन् अध्येषीष्ठाः अध्येषीयास्थाम् अध्येषीढ्वम् अध्येषीय अध्येषीवहि अध्येषीमहि। लुङ्—अध्यैष्ट अध्यैषाताम् अध्यैषत अध्यैष्ठाः अध्यैषाथाम् अध्यैढ्वम् अध्यैषि अध्यैष्वहि अध्यैष्महि, अध्यगीष्ट अध्यगीषाताम् अध्यगीषत अध्यगीष्ठाः अध्यगीषाथाम् अध्यगीढ्वम् अध्यगीषि अध्यगीष्वहि अध्यगीष्महि। अध्यैष्यत, अध्यगीष्यत॥

नामधेयम् = नाम। भागधेयम् = भाग्य। स्वल्पम् = कम। निग्रहः = मारण, मारना। लज्जमानः = शर्मिन्दा। दारकः = बालक। मिश्रः = श्रेष्ठ। अलीकम् = मिथ्या, निष्फल।

मैरेयम् = मद्य, नशा । वैहासिकः = दिल्लगीबाज । सस्त्रीकः = स्त्रीकेसाथ । कर्णेजपः = चुगलखोर । आयोधनम् = संग्राम । आटोपः = अवलेप, गर्व । मङ्गलसंवादः = खुशखबरी । प्रपञ्चः = ठगई ॥

भाषा बनाओ ।

आसीद् विशेषा फलपुष्पवृद्धिः । सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट । विद्वत्सभां मूढजना न यान्ति । के शेरते पृच्छति कोटपालः । अधीमहे सम्प्रति न्यायशास्त्रम् । कर्णेजपस्य वचनं नहि ते शृण्वन्ति । अयं न वैहासिकएष्यति प्रभो ! ॥

संस्कृत बनाओ ।

फल और फूलोंकी विशेष वृद्धिथी । दशरथने वेदोंको पढ़ाथा और देवोंका सत्कार कियाथा । विद्वानोंकी सभामें मूर्ख लोग नहीं जाते । कौन सोते हैं कोतवाल पूछते हैं । इस समय हम न्यायशास्त्र पढ़ते हैं । वे चुगलखोरकी बातें नहीं सुनते । हे स्वामिन् ! यह दिल्लगीबाज नहीं जावेगा । ये लड़के आज क्या पढ़ेंगे ॥

अथोभयपदप्रकरणम् ॥

२०—दुह = दुहना, भरना ।

लट्—दोग्धि दुग्धः दुहन्ति धोक्षि दुग्धः दुग्ध दोह्मि

दुह्वः दुह्मः । दुग्धे दुहाते दुहते धुक्षे दुहाथे धुग्ध्वे दुहे दुह्वहे दुह्महे । लिट् दुदोह दुदुहतुः दुदुहुः दुदोहिथ,दुदोग्ध दुदुहथुः दुदुह दुदोह दुदुहिव दुदुहिम । दुदुहे दुदुहाते दुदुहिरे दुदुहिषे दुदुहाथे दुहिध्वे दुदुहे दुदुहिवहे दुदुहिमहे । लुट्-दोग्धा दोग्धारौ दोग्धारः दोग्धासि, दोग्धासे । धोक्ष्यति, धोक्ष्यते । लोट्—दोग्धु, दुग्धात् दुग्धाम् दुहन्तु दोग्धि दुग्धम् दुग्ध दोहानि दोहाव दोहाम । दुग्धाम् दुहाताम् दुहताम् धुक्ष्व दुहाथाम् धुग्ध्वम् दोहै दोहावहै दोहामहै । लङ्—अधोग्, क्,अदुग्धाम् अदुहन् अधोग्, क्, अदुग्धम् अदुग्ध अदोहम् अदुह्व अदुह्म । अदुग्ध अदुहाताम् अदुहत अदुग्धाः अदुहाथाम् अदुग्ध्वम् अदुहि अदुह्वहि अदुह्महि । वि० लिङ्—दुह्यात् दुह्याताम् दुह्युः । दुहीत दुहीयाताम् दुहीरन् । आ० लिङ्-दुह्यात् दुह्यास्ताम् दुह्यासुः। धुक्षीष्ट धुक्षीयास्ताम् धुक्षीरन् । लुङ्—अधुक्षत् अधुक्षताम् अधुक्षन् । अधुक्षत, अदुग्ध अधुक्षाताम् अधुक्षन्त अधुक्षथाः, अदुग्धाः अधुक्षाथाम् अधुक्षध्वम् अदुग्ध्वम्, अधुक्षि अधुक्षावहि, अदुह्वहि अधुक्षामहि । लृङ्—अधोक्ष्यत् । अधोक्ष्यत ॥

२१—दिह = वृद्धि, बढ़ना ।

देग्धि दिग्धः दिहन्ति धेक्षि दिग्धः दिग्ध देह्मि दिह्वः

दिह्मः। दिग्धे दिहाते दिहते धिक्षे दिहाथे धिग्ध्वे दिहे दिह्वहे दिह्महे । लिट्—दिदेह दिदिहतुः दिदिहुः दिदेहिथ, दिदेग्ध दिदिहथुः दिदिह दिदेह दिदिहिव दिदिहिम । दिदिहे दिदिहाते दिदिहिरे दिदिहिषे दिदिहाथे दिदिहिध्वे दिदिहे दिदिहिवहे दिदिहिमहे । लुट्—देग्धा देग्धारौ देग्धारः । देग्धासे । लृट्—धेक्ष्यति । धेक्ष्यते । लोट्—देग्धु । दिग्धाम् । लङ् अधेग्, क् । अदिग्ध । वि० लिङ्—दिह्यात् दिह्याताम् दिह्युः । दिहीत दिहीयाताम् दिहीरन् । आ० लिङ्—दिह्यात् दिह्यास्ताम् दिह्यासुः । धिक्षीष्ट धिक्षीयास्ताम् धिक्षीरन । लुङ्—अधिक्षत् अधिक्षताम् अधिक्षन् । अधिक्षत, अदिग्ध अधिक्षाताम् अधिक्षन्त अधिक्षथाः, अदिग्धाः । लृङ्—अधेक्ष्यत् । अधेक्ष्यत ॥'दुह' धातुके तुल्य दिहके भी सर्वत्र रूप समझना चाहिये ॥

२२—लिह = स्वादलेना, चाटना ।

लट्—लेढि लीढः लिहन्ति लेक्षि लीढः लीढ लेह्मि लिह्वः लिह्मः लीढे लिहाते लिहते लिक्षे लिहाथे लीढ्वे लिहे लिह्वहे लिह्महे॥लिट्--लिलेह लिलिहतुः लिलिहुः लिलेहिथ लिलीढ लिलिहथुः लिलिह लिलेह लिलिहिव लिलिहिम । लिलिहे

लिलिहासे लिलिहिरे लिलिहिषे लिलिहाथे लिलिहिध्वे लिलिहे लिलिहिमहे । लुट्--लेढा लेढारौ लेढारः । लेढासे । लृट्--लेक्ष्यति । लेक्ष्यते । लोट्--लेढु, लीढात् लीढाम् लिहन्तु लीढि, लीढात् लीढम् लीढ लेहानि लेहाव लेहाम । लीढाम् लिहाताम् लिहताम् लिक्ष्व लिहाथाम् लीढ्वम् लेहै लेहावहै लेहामहै।लङ्-अलेड्,ड्,अलीढाम् अलिहन् अलेड् ट्, अलीढम् अलीढ अलिहम् अलिह्व अलिह्म । अलीढ आलिहाताम् अलिहत अलीढाः अलिहाथाम् अलीढ्वम् आलिहि अलिहहि अलिह्महि । वि०लिङ्--लिह्यात् । लिहीत लिहीयाताम् लिहीरन्।आ०लिङ्-लिह्यात् लिह्यास्ताम् लिह्यासुः। लिक्षीष्ट लिक्षीयास्ताम् लिक्षीरन । लुङ्--अलिक्षत् अलिक्षताम् अलिक्षन् । अलिक्षत, अलीढ अलिक्षाताम् अलिक्षन्त अलिक्षथाः, अलीढाः अलिक्षाथाम् अलिक्षध्वम्, अलीढ्वम् अलिक्षे अलिक्षावहि, अलिह्वहि अलिक्षामहि । लृङ्-अलेक्ष्यत् । अलेक्ष्यत ॥

२३--ब्रूञ् = स्पष्ट बोलना ।

लट्-आह आहतुः आहुः आत्थ आहथुः । ब्रवीति ब्रूतः ब्रुवन्ति ब्रवीषि ब्रूथः ब्रूथ ब्रवीमि ब्रूवः ब्रूमः। ब्रूते ब्रुवाते ब्रुवते

ब्रूष ब्रुवाथे ब्रूध्वे ब्रुवे ब्रूवहे ब्रूमहे। लिट्-उवाच ऊचतुः ऊचुः उवचिथ, उवक्थ ऊचथुः ऊच उवाच, उवच ऊचिव ऊचिम। ऊचे ऊचाते ऊचिरे ऊचिषे ऊचाथे ऊचिध्वे ऊचे ऊचिवहे ऊचिमहे। वक्ता। वक्तासे। वक्ष्यति। वक्ष्यते। ब्रवीतु ब्रूहि ब्रवाणि। ब्रूताम् ब्रुवाताम् ब्रुवताम् ब्रूष्व ब्रुवाथाम् ब्रूध्वम् ब्रवै ब्रवावहै ब्रवामहै। अब्रवीत् अब्रूताम् अब्रुवन् अब्रवीः। अब्रूतम् अब्रूत अब्रुवम् अब्रूव अब्रूम। अब्रूत अब्रुवाताम् अब्रुवत अब्रूथाः अब्रुवाथाम् अब्रूध्वम् अब्रुवि अब्रूवहि अब्रूमहि। ब्रूयात् ब्रूयाताम् ब्रूयुः। ब्रुवीत ब्रुवीयाताम् ब्रुवीरन्। उच्यात् उच्यास्ताम् उच्यासुः। वक्षीष्ट वक्षीयास्ताम् वक्षीरन्। अवोचत् अवोचताम् अवोचन्। अवोचत अवोचेताम् अवोचन्त। अवक्ष्यत्। अवक्ष्यत॥

२४-ऊर्णुञ् = आच्छादन, ढांकना।

लट्--ऊर्णौति, ऊर्णोति ऊर्णुतः ऊर्णुवन्ति ऊर्णौषि, ऊर्णोषि ऊर्णुथः। ऊर्णुथ ऊर्णौमि, ऊर्णोमि ऊर्णुवः ऊर्णुमः। ऊर्णुते ऊर्णुवाते ऊर्णुवते ऊर्णुषे ऊर्णुवाथे ऊर्णुध्वे ऊर्णुवे ऊर्णुवहे ऊर्णुमहे। लिट्—ऊर्णुनाव ऊर्णुनुवतुः ऊर्णुनुवुः ऊर्णुनुविथ ऊर्णुनविथ ऊर्णुनुवथुः ऊर्णुनुव

ऊर्णुनाव, ऊर्णुनव ऊर्णुनुविव ऊर्णुनुविम। ऊर्णुनुवे ऊर्णुनुवाते ऊर्णुनुविरे ऊर्णुनुविषे ऊर्णुनुवाथे ऊर्णुनुविध्वे ऊर्णुनुवे ऊर्णुनुविवहे ऊर्णुनुविमहे। ऊर्णुविता, ऊर्णविता। ऊर्णुवितासे, ऊर्णवितासे। ऊर्णुविष्यति, ऊर्णविष्यति। ऊर्णुविष्यते, ऊर्णविष्यते। ऊर्णौतु, ऊर्णोतु ऊर्णुहि ऊर्णवानि ऊर्णवाव ऊर्णुताम् ऊर्णुवाताम् ऊर्णुवताम् ऊर्णुष्व ऊर्णुवाथाम् ऊर्णुध्वम् ऊर्णवै ऊर्णवावहै ऊर्णवामहै। लङ्-और्णोत् और्णुताम् और्णुवन्। और्णुत और्णुवाताम् और्णुवत वि० लिङ्--ऊर्णुयात् ऊर्णुयाताम् ऊर्णुयुः। ऊर्णुवीत ऊर्णुवीयाताम् ऊर्णुवीरन्। आ० लिङ्-ऊर्णूयात् ऊर्णूयास्ताम् ऊर्णूयासुः। ऊर्णुविषीष्ट ऊर्णुविषीयास्ताम् ऊर्णुविषीरन्। ऊर्णविषीष्ट ऊर्णविषीयास्ताम् ऊर्णविषीरन्। लुङ्-और्णावीत् और्णाविष्टाम् और्णाविषुः। और्णवीत और्णविष्टाम् और्णविषुः। और्णुवीत् और्णुविष्टाम् और्णुविषुः और्णाविष्ट और्णाविषाताम् और्णविषत। और्णुविष्ट और्णुविषाताम् और्णुविषत। लङ्-और्णुविष्यत और्णविष्यत्, और्णुविष्यत, और्णविष्यत॥

लवङ्गम्=लौंग। पल्वलम्=तलैया। पललम्=मांस। सलिलम्-

पानी। ललाटम्=माथा। वर्तिः=बत्ती। वर्तिकः=बटेर। निदाघः=गर्मीका समय। तितऊः=चलनी। शूर्पः=सूप। वदनम्=मुख। सदनम्=स्थान। अत्यवसानम्=भोजन। सौरभ्यम्=सुगन्धि। दाक्षिण्यम्=चतुराई। पर्जन्यः=मेघ। शिविरम्=छावनी। चपला=बिजली। व्यजनम्=पंखा। प्रक्षालनम् = धोना। सविधम् = समीप। तूलम् = रूई। मूलम्= जड़। तृष्णा=लोभ। धिषणा = बुद्धि॥

भाषा बनाओ।

दुहन्ति धेनूः पुरुषाःपयोनः। दुग्धि क्षीरेण पौरुषम्। लिहन्ति धेनवोवत्स्यान्। रसं लीढि रूपं जहि। स्वस्तये वायुमुपब्रवावहै। ब्रवीमि सत्यं सदने पठामि। लवङ्गतैलस्य भविष्यति किम्? ऊर्णोतु वस्त्रेण मुखं स्वकीयम्। अत्यवसानाय व्रजन्ति ब्राह्मणाः॥ पीडाललाटे कथमस्तितेवटो!। वर्त्तिनो-दीपके तैलं शयेऽहं त्वमधीथाः। अन्धकवर्त्तकीयेन कार्यं न्यायेन सिध्यिति? तृष्णे! देवि! नमस्तुभ्यम्।

संस्कृत बनाओ।

हमारे आदमी गउओं का दूध दुहते हैं। दूधसे पुरुषार्थ बढ़ता है। गायें बछड़ोंको चाटती हैं। तू रसको चाट और क्रोध

को छोड़ । कल्याणार्थ हम वायुका सम्यक् व्याख्यान करें । मैं सच कहताहूं कि घर पर पढ़ताहूं । लौंगके तेल का क्या होगा । आप कपड़े से अपने मुखको ढांकलें । भोजनके लिये ब्राह्मण आते हैं ब्रह्मचारिन् ! तेरे माथेमें पीड़ा क्यों है ? । मेरे दीपक में न वत्ती है और न तेल अतएव मैं सोता हूं और तू पढ़ । अन्धकी बटेर 'इस' न्याय से कार्य सिद्ध होता है ? ॥

अथ जुहोत्यादिगणप्रकरणम् ॥

१—हु = देना, लेना, होमकरना ।

लट्-जुहोति जुहुतः जुह्वति जुहोषि जुहुथः जुहुथ जुहोमि जुहुवः जुहुमः । लिट्-जुहवाञ्चकार जुहवाञ्चक्रतुः जुहवाञ्चक्रुः जुहवाम्बभूव । जुहवामास । जुहाव जुहुवतुः जुहुवुः जुहोथ, जुहविथ जुहुवथुः जुहुव जुहाव, जुहव जुहुविव जुहुविम । होता । होष्यति । लोट्-जुहोतु, जुहुतात् जुहुताम् जुह्वतु जुहुधि जुहुतात् जुहुतम् जुहुत जुहवानि जुहवाव जुहवाम । अजुहोत् अजुहुताम् अजुहवुः अजुहोः अजुहुतम् अजुहुत अजुहवम् अजुहुव अजुहुम । विधिलिङ्-जुहुयात् जुहुयाताम् जुहुयुः जुहुयाः जुहुयातम् जुहुयात जुहुयाम् जुहुयाव जुहुयाम । आ० लिङ्- हूयात् हूयास्ताम् हूयासुः । लुङ्-अहौषीत् अहौष्टाम्

अहौषुः अहौषीः अहौष्टम् अहौष्ट अहौषम् अहौष्व अहौष्म। लृङ्-अहोष्यत् ॥

२-ञि-भी = भयकरना, डरना।

लट्—बिभेति बिभितः, बिभीतः बिभ्यति बिभेषि बिभिथः, बिभीथः बिभिथ, बिभीथ बिभेमि बिभिवः, बिभीवः बिभिमः, बिभीमः। लिट्—बिभयाञ्चकार। बिभयाम्बभूव। बिभयामास। बिभाय बिभ्यतुः बिभ्युः बिभेथ, बिभयिथ बिभ्यथुः बिभ्य बिभाय, बिभय बिभ्यिव बिभ्यिम। भेता। भेष्यति। लोट् बिभेतु, बिभितात्, बिभीतात् बिभताम्, बिभीताम् बिभ्यतु बिभिहि, बिभीहि, बिभितात्, बिभीतात् बिभितम्-बिभीतम् बिभित, बिभीत बिभयानि बिभयाव बिभयाम। लङ्-अबिभेत् अबिभिताम्, अबिभीताम् अबिभयुः अबिभेः अबिभितम् अबिभीतम् अबिभित, अबिभीत अबिभयम् अबिभिव, अबिभीव अबिभिम, अबिभीम। वि० लिङ्-बिभियात्, बिभीयात् बिभियाताम् बिभीयाताम् बिभियुः, बिभीयुः बिभियाः, बिभीयाः बिभियातम् बिभीयातम् बिभियात बिभीयात बिभियाम्, बिभीयाम् बिभियाव, बिभीयाव बिभियाम, बिभीयाम आ० लिङ्-भीयात् भीयास्ताम् भीयासुः। लुङ्-अभैषीत् अभैष्टाम् अभैषुः। अभेष्यत् ॥

३—ह्री = लज्जा शर्म ॥

लट्—जिह्रेति जिह्रीतः जिह्रियति जिह्रेषि जिह्रीथः जिह्रीथ जिह्रेमि जिह्रीवः जिह्रीमः । लिट्--जिह्रयाञ्चकार । जिह्रयाम्बभूव । जिह्रयामास । जिह्राय जिह्रियतुः जिह्रियुः जिह्रेथ, जिह्रयिथ जिह्रियथुः जिह्रिय जिह्राय, जिह्रय जिह्रियिव जिह्रियिम । ह्रेता । ह्रेष्यति । जिह्रेतु, जिह्रीतात् जिह्रीताम् जिह्रियतु जिह्रीहि, जिह्रीतात् जिह्रीतम् जिह्रीत जिह्रयाणि जिह्रयाव जिह्रयाम । लङ्-अजिह्रेत् अजिह्रीताम् अजिह्रियुः अजिह्रेः अजिह्रीतम् अजिह्रीत अजिह्रियम् अजिह्रीव अजिह्रीम । वि० लिङ्—जिह्रीयात् जिह्रीयाताम् जिह्रीयुः । आ०लिङ्--ह्रीयात् ह्रीयास्ताम् ह्रीयासुः । अह्रैषीत् अह्रैष्टाम् अह्रैषुः । अह्रेष्यत् ॥

४—पृ = पालना, पूराकरना, भरना ॥

लट्—पिपर्ति पिपूर्तः पिपुरति पिपर्षि पिपूर्थः पिपूर्थ पिपर्मि पिपूर्वः पिपूर्मः । लिट्-पपार पप्रतुः, पपरतुः पप्रुः, पपरुः पपरिथ पप्रथुःपपरथुः पप्र,पपर पपार,पपर पप्रिव पपरिव पप्रिम, पपरिम । लुट्- परिता, परीता । परिष्यति, परीष्यति । लोट्—पिपर्तु पिपूर्तात् पिपूर्ताम् पिपुरतु पिपूर्हि, पिपूर्तात् पिपूर्तम् पिपूर्त पिपराणि पिपराव पिपराम लङ्—अपिपः अ-

पिपूर्तम् अपिपूर्त अपिपरम् अपिपूर्व अपिपूर्म । वि० लिङ्-पिपूर्यात् पिपूर्याताम् पिपूर्युः पिपूर्याः पिपूर्यातम् पिपूर्यात पिपूर्याम् पिपूर्याव पिपूर्याम । आ० लिङ्-पूर्यात् पूर्यास्ताम् पूर्यासुः पूर्याः पूर्यास्तम् पूर्यास्त पूर्यासम् पूर्यास्व पूर्यास्म । लुङ्-अपारीत् अपारिष्टाम् अपारिषुः।अपारिष्यत् अपरीष्यत्॥

५-ओहाक्--हा = त्याग, छोड़ना ।

लट्-जहाति जहितः, जहीतः जहति जहासि जहिथः, जहीथः जहिथ, जहीथ जहामि जहिवः, जहीवः जहिमः, जहीमः । लिट्-जहौ जहतुः जहुः जहिथ, जहाथ जहथुः जह जहौ जहिव जहिम । हाता । हास्यति । जहातु, जहितात्, जहीतात् जहिताम्, जहीताम् जहतु जहाहि, जहिहि, जहीहि जहितम्, जहीतम् जहित, जहीत जहानि जहाव जहाम । लङ्--अजहात् अजहिताम्, अजहीताम् अजहुः अजहाः अजहितम्, अजहीतम् अजहित, अजहीत अजहाम् अजहिव, अजहीव अजहिम, अजहीम । वि० लिङ्-जह्यात् जह्याताम् जह्युः।हेयात् हेयास्ताम् हेयासुः लुङ्-अहासीत् अहासिष्टाम् अहासिषुः अहास्यत् ।

अथात्मनेपादिनः ॥

६–माङ् = मान, मापना, तोलना ।

लट्–मिमीते मिमाते मिमते मिमीषे मिमाथे मिमीध्वे मिमे मिमीवहे मिमीमहे । लिट्–ममे ममाते ममिरे ममिषे ममाथे ममीध्वे ममे ममिवहे ममिमहे । माता । मास्यते । लोट्–मिमीताम् मिमाताम् मिमताम् मिमीष्व मिमाथाम् मिमीध्वम् मिमै मिमावहै मिमामहै । लङ्–अमिमीत अमिमाताम् अमिमत अमिमीथाः अमिमाथाम् अमिमीध्वम् अमिमि अमिमीवहि अमिमीमहि । वि०लिङ्‌ मिमीत मिमीयाताम् मिमीरन् । मासीष्ट मासीयास्ताम् मासीरन् । लुङ्–अमास्त अमासाताम् अमासत अमास्थाः अमासाथाम् अमाध्वम् अमासि अमास्वहि अमास्महि । अमास्यत ॥

७–ओहाङ्–हा = ज्ञान, गमन, प्राप्ण ।

लट्–जिहीते जिहाते जिहते जिहीषे जिहाथे जिहीध्वे जिहे जिहीवहे जिहीमहे । लिट्–जहे जहाते जहिरे जहिषे जहाथे जहिध्वे जहे जहिवहे जहिमहे। हाता।हास्यते।लोट्–जिहीताम् जिहाताम् जिहताम् जिहीष्व जिहाथाम् जिहीध्वम् जिहै जिहावहै जिहामहै । लङ्–अजिहीत अजिहाताम् अजिहत अजिहीथाः अजिहाथाम् अजिहीध्वम् अजिहि अजिहीवहि अजि-

हीमहि। वि० लिङ्-जिहीत जिहीयाताम् जिहीरन्। हासीष्ट हासीयास्ताम् हासीरन्। अहास्त अहासाताम् अहासत। अहास्यत ॥

अघम् = पाप। अनघम् = पुण्य। अङ्कनम् = मोहर। कौक्कुटिकः = दम्भी। क्रयिकः = व्यापारी। सुधा = कलई, चूना। गन्धमुखा = छछूंदर। पश्यतोहरः = सुनार। पिठरः = थाली। वाचाटः = बकवादी। वागुरिकः = शिकारी। कुलायः = घोंसला। प्रसन्नता = खुशी। प्रवीणः = चतुर। मद्कटः = खांड़, चीनी। मधुकरः = भौंरा। मेदुरम् = चिकना। वल्कलम् = छिलका, छाल। प्रत्यूहः = विघ्न। यवनिका = क़नात। सहायता = मदद। सामग्री = सरंजाम। उपवनम् = बाग। कुञ्चिका = कुंजी। मञ्चिका = कुर्सी। उपक्रमः = आरम्भ। व्यतिक्रमः = उलटा। चामीकरम् = सोना

भाषा बनाओ।

जुहोति हव्येन हिरण्यरेतसम्। अघाद् बिभेमि सर्वदा। पिपूर्मि पात्रं भवतां जलेन। जहाहि निद्रां पठनं विधेयम्। मिमीते पश्यतोहरः। जिहीते बालकोऽम्बिकयाम्। मद्कटं क्रयिकोऽवहते प्रभो!। मधुकरा न लिहन्ति रसं कवे!। जिहेमि-

नीचसङ्गत्या । कपाटौ लोटतां द्वटो ।। उपवने पवनं न निसेवते। सहायतां वाञ्छति वञ्चकोऽयम् ॥

संस्कृत बनाओ ॥

वह सामग्रीसे अग्निमें हवन करता है। मैं पापसे सदा डरता हूं। मैं आपके बर्तनको पानीसे भरता हूं। तू नींदको त्याग और पढ़। सुनार सोनेको तोलता है। बालक विद्याको प्राप्त करता है। हे स्वामिन! व्यापारी शकरको लिये जाता है। क्या कविजी! भौंरे रसको नहीं चाटते ?। नीच सङ्गतिसे लज्जित होता हूं। अयि लड़के! किवाड़ लगाले। क्या आप बाग में हवा नहीं खाते। यह जालसाज मदद चाहता है ॥

अथोभयपादिनः ॥

८—डुभृञ्--भृ = धारण, पोषण ॥

लट्—बिभर्ति बिभृतः बिभ्रति बिभर्षि बिभृथः बिभृथ बिभर्मि बिभृवः बिभृमः। बिभृते बिभ्राते बिभ्रते बिभृषे बिभ्राथे बिभृध्वे बिभ्रे बिभृवहे बिभृमहे। लिट्—बिभराञ्चकार। बिभराम्बभूव। बिभरामास। बभार बभ्रतुः बभ्रुः बभर्थ बभ्रथुः

बभ्र बभार, बभर बभृव बभृम। बिभराञ्चकार बिभरांबभूव। बिभरामास। बभ्रे बभ्राते बभ्रिरे बभृषे बभ्राथे बभृढ्वे बभ्रे बभृवहे बभृमहे। लुट्—भर्ता भर्तासि भर्तासे। भरिष्यति। भरिष्यते। लोट्—बिभर्तु, बिभृतात् बिभृताम् बिभ्रतु बिभृहि, बिभृतात् बिभृतम् बिभृत बिभराणि बिभराव बिभराम। बिभृताम् बिभ्राताम् बिभ्रताम् बिभृष्व बिभ्राथाम् बिभृध्वम् बिभ्रै बिभ्रावहै बिभ्रामहै। लङ्—अबिभः अबिभृताम् अबिभरुः अबिभः अबिभृतम् अबिभृत अबिभरम् अबिभृव अबिभृम। अबिभृत अबिभ्राताम् अबिभ्रत अबिभृथाः अबिभ्राथाम् अबिभृध्वम् अबिभ्रि अबिभृवहि अबिभृमहि। वि० लिङ्—बिभृयात् बिभृयाताम् बिभृयुः बिभ्रीत बिभ्रीयाताम् बिभ्रीरन्। आ० लिङ् भ्रियात् भ्रियास्ताम् भ्रियासुः। भृषीष्ट भृषीयास्ताम् भृषीरन् भृषीष्ठाः भृषीयास्थाम् भृषीढ्वम् भृषीय भृषीवहि भृषीमहि। लुङ्-अभार्षीत् अभार्ष्टाम् अभार्षुः। अभृत अभृषाताम् अभृषत अभृथाः अभृषाथाम् अभृढ्वम् अभृषि अभृष्वहि अभृष्महि। अभरिष्यत्। अभरिष्यत॥

६—डुदाञ्—दा = देना।

लट्—ददाति दत्तः ददति। दत्ते ददाते ददते दत्से ददाथे

दद्ध्वे ददे दद्वहे दद्महे । लिट्-ददौ ददतुः ददुः ददिथ, ददाथ ददथुः दद ददौ ददिव ददिम । ददे ददाते ददिरे ददिषे ददाथे ददिध्वे ददे ददिवहे ददिमहे । लुट्-दाता दातासि । दातासे । दास्यति । दास्यते । ददातु । दत्ताम् ददाताम् ददताम् । लङ्—अददात् अदत्ताम् अददुः अददाः अदत्तम् अदत्त अददाम् अदद्व अदद्म । अदत्त अददाताम् अददत अदत्थाः अददाथाम् अदद्ध्वम् अददि अदद्वहि अदद्महि । वि० लिङ्-दद्यात् दद्याताम् दद्युः । ददीत ददीयाताम् ददीरन् । आ० लिङ्-देयात् देयास्ताम् देयासुः । दासीष्ट दासीयास्ताम् दासीरन् । लुङ्-अदात् अदाताम् अदुः । अदित अदिषाताम् अदिषत । अदास्यत् । अदास्यत ॥

१०—डुधाञ्-धा = धारणकरना-पालन ॥

लट्-दधाति धत्तः दधाति दधासि धत्थः धत्थ दधामि दध्वः दध्मः । धत्ते दधाते दधते धत्से दधाथे धद्ध्वे दधे दध्वहे दध्महे । लिट्-दधौ दधतुः दधुः दधिथ, दधाथ दधथुः दध दधौ दधिव दधिम । दधे दधाते दधिरे दधिषे दधाथे दधिध्वे दधे दधिवहे दधिमहे । लुट्-धाता । धातासे । धास्यति ।

धास्यते। लोट्-दधातु, धत्तात् धत्ताम् दधतु धेहि, धत्तात् धत्तम् धत्त दधानि दधाव दधाम। धत्ताम् दधाताम् दधताम् धत्स्व दधाथाम् धध्वम् दधै दधावहै दधामहै। लङ्-अदधात् अधत्ताम् अदधुः अदधाः अधत्तम् अधत्त अदधाम् अदध्व अदध्म। अधत्त अदधाताम् अदधत अधत्थाः अदधाथाम् अधध्वम् अदधि अदध्वहि अदध्महि। वि०लिङ्-दध्यात् दध्याताम् दध्युः। दधीत दधीयाताम् दधीरन्। आ०लिङ्-धेयात् धेयास्ताम् धेयासुः। धासीष्ट धासीयास्ताम् धासीरन्। लुङ्-अधात् अधाताम् अधुः। अधित अधिषाताम् अधिषत। अधास्यत् अधास्यत॥

११—णिजिर् = शुद्धि, पालन।

लट्—नेनेक्ति नेनिक्तः नेनिजति नेनेक्षि नेनिक्थः नेनिक्थ नेनेज्मि नेनिज्वः नेनिज्मः। नेनिक्ते नेनिजाते नेनिजते नेनिक्षे नेनिजाथे नेनिग्ध्वे नेनिजे नेनिज्वहे नेनिज्महे। लिट्—निनेज निनिजतुः निनिजुः निनेजिथ, निनेक्थ निनिजथुः निनिज निनेज निनिजिव निनिजिम। निनिजे निनिजाते निनिजिरे निनिजिषे निनिजाथे निनिजिध्वे निनिजे निनिजिवहे निनिजिमहे। लुट्—नेक्ता नेक्तारौ नेक्तारः नेक्तासि।

नेक्ष्यासे । नेक्ष्यति । नेक्ष्यते । लोट्-नेनेक्तु, नेनिक्तात् नेनिक्ताम् नेनिजतु नेनिग्धि, नेनिक्तात् नेनिक्तम् नेनिक्त नेनेजानि नेनेजाव नेनेजाम । नेनिक्ताम् नेनिजाताम् नेनिजताम् नेनिक्ष्व नेनिजाथाम् नेनिग्ध्वम् नेनेजै नेनेजावहै नेनेजामहै। लङ् अनेनेग्,क् अनेनिक्ताम् अनेनिजुः अनेनेग्,क् अनेनिक्तम् अनेनिक्त अनेनेजम् अनेनिज्व अनेनिज्म । अनेनिक्त अनेनिजाताम् अनेनिजत अनेनिक्थाः अनेनिजाथाम् अनेनिग्ध्वम् अनेनिजि अनेनिज्वहि अनेनिज्महि । वि० लिङ्-नेनिज्यात् नेनिज्याताम् नेनिज्युः । नेनिजीत नेनिजीयाताम् नेनिजीरन् । आ० लिङ्-निज्यात् निज्यास्ताम् निज्यासुः । निक्षीष्ट निक्षीयास्ताम् निक्षीरन् । लुङ्-अनैक्षीत् । अनैक्ताम् अनैक्षुः । अनिजत् अनिजताम् अनिजन् । अनिक्त अनिजाताम् अनिजत अनिक्थाः अनिजाथाम् अनिग्ध्वम् अनिजि अनिज्वहि अनिज्महि । अनेक्ष्यत् । अनेक्ष्यत ।

रथिकः=रथी, रथवान।अश्वारोहः = सवार। पाथेयम् = सफ़रखर्चा । गोमयम् = गोबर । आसिकः = तलवारवाला । याष्टीकः = लाठीवाला । शाक्तीकः = भालेवाला । धानुष्कः = धनुषधारी । मण्डलाधिपतिः=

कलेक्टर। मण्डलसन्धाता = कमिश्नर। प्रेक्षामन्दिरम् = थियेटर। विकृतमस्तिष्कः = पागल। प्रातःकृत्यम् = शौचस्नानादि। बाहुयुद्धम् = कुश्ती। भवितव्यता = किस्मत, होनी। स्निग्धता = चिकनाई। रूक्षता = रूखापन। मित्रता = दोस्ती। शत्रुता = दुश्मनी॥

भाषा बनाओ।

तन्मे वरद्वयमुररीकृतपूर्वमेव, याचे बिभर्तु भरतस्तत्र राजलक्ष्मीम्। वर्षाणि तिष्ठतु चतुर्दश दण्डकायम्, सौमित्रि मैथिलसुतासहितश्च रामः। दाता न दापयति दापयिता न दत्ते। मेधां मे वरुणोददातु। विद्यार्थिनोविदधते यतिनां प्रणामान्। बिज्ञात दोषेषु दधाति दण्डम्। न सर्वाणि वस्त्राणि नेनेक्ति भृत्यः। अश्वारोहा न धावन्ति याष्टीका घ्नन्ति दारकान्। युध्यन्ते बाहुयुद्धं ते॥

संस्कृत बनाओ।

(केकयी बोली) जो मेरे लिये दो वरदान पूर्वही स्वीकृत किये हैं उनको मैं मांगती हूं—भरत तुम्हारी राजगद्दी को भोगे और लक्ष्मण तथा सीतासहित रामचन्द्र १४ वर्ष तक वनमें रहें। दाता दिलवाता नहीं और दिलवाने वाला

देता नहीं । हे परमात्मन् ! मेरे लिये पवित्र बुद्धि दीजिये । संन्यासियों को विद्यार्थी प्रणाम करते हैं । सब कपड़ोंको नौकर साफ नहीं करता।सवार नहीं दौड़ते लठबाज लड़कोंको मारते हैं वे कुश्ती लड़ते हैं।दोषों के जाननेपर जो राजा दण्ड देता है ॥

अथ दिवादिगणप्रकरणम् ॥

१–दिवु = क्रीडा, जीतनेकी इच्छा, जुआखेलना व्यवहार, चमक, स्तुति हर्ष, मद, स्वप्न, शोभा, ज्ञान, गमन, प्राप्ति ।

लट्–दीव्यति दीव्यतः दीव्यन्ति दीव्यसि दीव्यथः दीव्यथ दीव्यामि दीव्यावः दीव्यामः । लिट्–दिदेव दिदिवतुः दिदिवुः दिदेविथ दिदिवथुः दिदिव दिदेव दिदिव दिदिम। देविता । देविष्यति । दीव्यतु, दीव्यतात् दीव्यताम् दीव्यन्तु दीव्य, दीव्यतात् दीव्यतम् दीव्यत दीव्यानि दीव्याव दीव्याम । अदीव्यत् अदीव्यताम् अदीव्यन् । दीव्येत् दीव्येताम् दीव्येयुः । दीव्यात् दीव्यास्ताम् दीव्यासुः । अदेवीत् अदेविष्टाम् अदेविषुः । अदेविष्यत् ॥

२–षिवु = सीना ।

सीव्यति । सिषेव सिषिवतुः सिषिवुः सिषेविथ सिषिवथुः

सिषिव सिषेव सिषिविव सिषाविम । सेविता सेविष्यति । सीव्यतु । असीव्यत् । सीव्येत् । सीव्यात् । असेवीत् असेविष्टाम् असेविषुः । असेविष्यत् ॥

३—नृती = नाचना, उछलना ।

नृत्यति । ननर्त ननृततुः ननृतुः ननर्तिथ ननृतथुः नृन ननर्त ननृतिव ननृतिम । नर्तिता । नर्तिष्यति, नर्त्स्यति । नृत्यतु । अनृत्यत् नृत्येत् । नृत्यात् । अनर्तीत् अनर्तिष्टाम् अनर्तिषु । अनर्तिष्यत्, अनर्त्स्यत् ॥

४—त्रसी = घबड़ाहट, डरना ।

त्रस्यति त्रस्यतः त्रस्यन्ति । त्रसति त्रसतः त्रसन्ति । तत्रास तत्रसतुः तत्रसुः तत्रसिथ तत्रसथुः तत्रस तत्रास, तत्रस तत्रसिव तत्रसिम, पक्षे-तत्रास त्रेसतुः त्रेसुः । त्रसिता । त्रसिष्यति । त्रस्यतु, त्रसतु । अत्रस्यत्, अत्रसत् । त्रस्येत्, त्रसेत् । त्रस्यात् त्रस्यास्ताम् त्रस्यासुः । अत्रासीत् अत्रासिष्टाम् अत्रासिषुः । अत्रसिष्यत् ॥

५—शो = छीलना, बारीककरना ।

श्यति श्यतः श्यन्ति । शशौ शशतुः शशुः शशिथ, शशाथ

शशाथुः शश शशौ शशिव शशिम । शाता । शास्यति।श्यतु। अश्यत् । श्येत् । शायात । अशात्, अशासीत् । अशास्यत्॥

६--छो = छेदना, बींधना ।

छ्यति । चच्छौ चच्छतुः चच्छुः । छाता । छास्यति । छ्यतु अच्छ्यत् । छ्येत्।छायात्।अच्छासीत्,अच्छात्।अच्छास्यत् ॥
